क्रियाविशेषणानां कर्मत्वं क्लीबता च

डॉ. सुखदेव-भट्टः *

Abstract

[यत् वचनम्, या च विभक्तिः विशेष्यस्य भवति तदेव वचनम्, सा च विभक्तिः विशेषणस्यापि भवति इति सामान्यं वचनं वर्तते । किन्तु यदि क्रियाविशेषणं भवति तर्हि तस्य विशेषणस्य का गतिः स्यात् । यतो हि क्रियायाः लिङ्गम्, विभक्तिश्च न सम्भवतः । अतः अलिङ्गभूतस्य यद् विशेषणं भवति तत् कस्यां विभक्तौ स्यात् इति चिन्तनं प्रकृते प्रबन्धे प्रस्तुतो वर्तते । तदर्थम् अत्र प्रकारद्वयम् अस्ति—क्रियाविशेषणानां कर्मत्वं क्लीबता च इति वचनम् आश्रयणीयम् इत्येकम् । अपरञ्च व्यपदेशिवद्भावः इत्युक्ते तादत्म्यसम्बन्धोऽपि फलतावच्छेदकसम्बन्धो भवति । अर्थात् तादात्म्यसम्बन्धेन यत्र फलं तिष्ठति तदपि कर्म भवति । एवं कर्म भवति चेत् तस्मिन् पक्षे "कर्मणि द्वितीया" [अष्टाध्यायी २.३.२] इत्यनेन द्वितीया सिद्ध्यति । पुनः वचनान्तरस्य अपेक्षा न भवति ।]

कुञ्चिकाशब्दाः— क्रियाविशेषणम्, कर्मत्वम्, क्लीबता, लिङ्गम्, विभक्तिः, विक्लित्तिः

सामान्यतो ज्ञायते—

यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य ।
तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्यापि ॥ इति ।

[प्रौढमनोरमा]

तस्यायमर्थः—यद् लिङ्गम्, यद् वचनम्, या च विभक्तिः विशेष्यस्य भवति, तदेव लिङ्गम्, तदेव वचनम्, सा एव विभक्तिः विशेषणस्य अपि भवतीति । यदि कर्तुः विशेषणं भवति चेत् कर्ता यदि प्रथमाविभक्तौ भवति तर्हि तद्विशेषणमपि प्रथमाविभक्तौ भवति । यथा—चैत्रः ग्रामं गच्छतीति वाक्ये व्यापाराश्रयः कर्ता चैत्रः अस्ति । यदि तस्य विशेषणं सुन्दरः भवति चेत् तदा वाक्यं भवति—सुन्दरः चैत्रः ग्रामं गच्छति । एवमेव यदि फलाश्रयत्वाद् ग्रामरूपं कर्म विशेष्यं भवति सुन्दरमिति विशेषणम् । तदा चैत्रः सुन्दरं ग्रामं गच्छति इति वाक्यं घटते । एवमस्य सारो भवति—तत्तत्कारकं यस्यां विभक्तौ विशेष्यं वर्तते तस्य विशेषणं तत्तद्विभक्तौ भवति । किन्तु क्रियायाः विशेषणं चेत् क्रियायाः किमपि लिङ्गम्, किमपि वचनम्, काऽपि च विभक्तिर्नास्ति ।

* सहायकाध्यापकः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने, वेलुडमठे, पश्चिमवङ्गेषु ; Email : sukhdevbhatt99@gmail.com

यच्च वचनं तत्र प्रतिभाति सा कर्तुः संख्याः न तु क्रियायाः । एवमेव चैत्रेण तण्डुलः पच्यते, तण्डुलौ पच्येते, तण्डुलाः पच्यन्ते इत्यादिषु यद्वद् वचनमस्ति तत्तु कर्मणः न तु क्रियायाः । तर्हि क्रियायाः विशेषणम् इति चेत् तत् कथं वक्तव्यम्? अपि च भाष्ये "क्रिया नामेयमत्यन्ताऽपरिदृष्टा । अशक्या क्रिया पिण्डीभूता निर्दशयितुं यथा गर्भो निर्लुठितः । सासावनुमानगम्या"[१] इति भाष्येण क्रियायाः ऐक्यमिति गम्यते । एका एव इत्युक्तम् । क्रिया एका एव इत्युक्ते— चैत्रः अत्र, मैत्रः तत्र एवं विष्णुमित्रः अन्यत्र इति सर्वेऽपि पाकं कुर्वन्ति चेत् कदाचित् प्रकरणाद् एते व्यापाराः भिन्नाः भिन्नाः इति ज्ञायते । किन्तु धातोः तत् सामर्थ्यं नास्ति । धातुः विभिन्नव्यापारान् न बोधयति । निवृत्तिभेदा एव क्रिया धातुना बोध्यते । निवृत्तिभेदा क्रिया इत्युक्तौ एका च क्रियेति निवृतभेदा सर्वत्र आख्यातेषु गम्यते । धातोः तादृशं सामर्थ्यं नास्ति । अतः देवदत्तयज्ञदत्तविष्णुमित्राः पचन्ति इत्युक्ते पच्-धातुना बोध्यमाना क्रिया या वर्तते सा क्रिया विक्लित्यनुकुलव्यापारतया एव भासते । नेह वस्त्वर्थो निरूप्यते । अनेनैव वचनेन क्रियाविशेषणस्य कर्मत्वमुच्यते । यतः कर्तृनिष्ठक्रियाजन्यफलाश्रयः कर्म इत्युच्यते । एवंभूतं कर्म भवति चेत्, कर्ता चैत्रः, तन्निष्ठा या क्रिया (विक्लित्त्यनुकूलव्यापाररूपा क्रिया), तज्जन्यं फलं विक्लित्तिः, तदाश्रयः तण्डुलः । इदानीं स्तोकपदार्थः तण्डुलस्य विशेषणं न, अपि तु क्रियायाः विशेषणम् । एवञ्च अत्र कर्तुरीप्सिततमं कर्म इत्यनेन कर्मसंज्ञा न सिद्ध्यति । अतः अनेन वचनेनैव (क्रियाविशेषणानां कर्मत्वं क्लीबता च)[२] कर्मत्वं साधनीयम् इति एकः पक्षः ।

नव्याः वदन्ति फलस्याऽपि व्यपदेशिवद्भावेन फलाश्रयत्वात् कर्मत्वम् । तस्यार्थो हि—स्तोकं तण्डुलं पचति इत्यत्र फलं विक्लित्तिः, विक्लित्तावेव विक्लित्त्याश्रयत्वम् उच्यते व्यपदेशिवद्भावेन । व्यपदेशः-मुख्यव्यवहारः, अर्थात् संयोगरूपफलं वर्तते, तस्य आश्रयो ग्रामः, एवञ्च संयोगोऽपि अस्ति, तस्य आश्रयः ग्रामोऽपि अस्ति । अयञ्च संयोगाश्रयः इति मुख्यव्यवहारवान् । ईदृशो व्यवहारः असहायेऽपि भवति । नाम केवलविक्लित्तौ विक्लित्त्याश्रयत्वं व्यपदेशिवद्भावेनोच्यते । विक्लित्तावेव यदा विक्लित्त्याश्रयत्वम् उक्तं तदा फलाश्रयत्वं नाम व्यपदेशिवद्भावेन । यथा अयं मे ज्येष्ठः, अयं मे मध्यमः, अयं

[१] "भूवादयो धातवः" [अष्टाध्यायी १.३.१] इति सूत्रभाष्यम् ।
[२] "अव्ययीभावश्च" [अष्टाध्यायी १.१.४१] इति सूत्रे काशिकायाम् ।

मे कनिष्ठः इति एकस्मिन्नेव पुत्रे असहाये ससहायनिष्ठव्यवहाराः (यत्र वस्तुतः त्रयः पुत्राः सन्ति- अयं प्रथमः, अयं द्वितीयः, अयं तृतीयः इति ते व्यवहाराः) अत्रापि भवन्ति । एवं फलं फलत्वेन असहायः । फले व्यपदेशिवद्भावः इत्युक्ते व्यपदेशिवदेकस्मिन् इत्यत्र एकशब्दः असहायवाची ।[३] एवञ्च फलम् असहायरूपं कदा भवति इत्युक्ते सजातीयद्वितीयाभावो यदा भवति तदानीमेव स असहायो भवति । गृहे एकाकी अस्मि इति वदति चेत् गृहे व्यजनमस्ति, भित्तिरस्ति इत्येतत् सर्वमस्ति । तर्हि कथं स एकाकी? तस्यायमर्थः— सजातीयद्वितीयो नास्तीति । तद्वत् फलम्, व्यापारः इत्यत्र व्यापारः अस्ति चेत् फलम् असहायः कथं भवति? तस्यार्थो हि तादृशं द्वितीयं फलं नास्तीति कृत्वा फलम् असहायो भवति । एवञ्च असहाये ससहायवद् व्यवहारो भवति । एवञ्च यथा ग्रामे संयोगाश्रयत्वम् उच्यते तद्वद् विक्लित्तौ विक्लित्त्यश्रयत्वमुच्यते । एवञ्च अस्याम् अवस्थायां प्रयोगः कथं भवतीति चेत्— चैत्रः पाकं पचति इत्येवं रूपेण भवति । पाकं पचति इत्यत्र तस्य विशेषणं स्तोकपदार्थः । नाम फलस्य इति उच्यते चेत् तदानीं तस्य स्तोकपदार्थः विशेषणम् अस्तीति कृत्वा तदेव अत्रापि भवतीति कृत्वा स्तोकं पाकं पचति इति प्रयोगः सिद्ध्यति इति एका रीतिः नागेशेन तत्प्राक्कालीकानुक्तरीतिः तेन उक्ता वर्तते ।

ननु व्यपदेशिवदेकस्मिन्निति व्यपदेशिवद्भावोऽसहाये[४] एव प्रवर्तते इति सम्प्रत्येव निरूपितम् । स्तोकं पचतीत्यादावसहायत्वेन व्यपदेशिवद्भावेऽपि स्तोकं तण्डुलं पचतीत्यत्र मुख्यधर्मवतः फलाश्रयस्य तण्डुलादेः समभिव्याहारस्य सत्वात् ससहाये व्यपदेशिवद्भावाभावात् कर्मत्वं न स्यादिति चेद् व्यपदेशिवद्भावेनेत्यस्य क्रियाविशेषणानामिति वचनेनेत्यर्थेनादोषादिति केचित् । फलतावच्छेदकसम्बन्धेन फलाश्रयस्य कर्मत्वं स्वीकार्यम् । अन्यथा पर्वतस्यापि कालिकसम्बन्धेन विक्लित्त्याश्रयत्वात् पर्वतं पचतीत्याद्यापत्तिः । तद्वारणाय फलतावच्छेदकसंबन्धेन फलाश्रयत्वस्य वक्तव्यतया फलस्य कर्मतायाः प्रामाणिकतया तन्निर्वाहकोपायान्तराभावेन तादात्म्यस्यापि फलतावच्छेदकसम्बन्धत्वं स्वीकार्यम् । स्तोकं तण्डुलं पचतीत्यत्र तण्डुलस्य कर्मत्वे समवायः फलतावच्छेदकसंबन्धः ।

[३] "आद्यन्तवदेकस्मिन्" [अष्टाध्यायी १.१.२१] इति सूत्रभाष्यम् ।
[४] "आद्यन्तवदेकस्मिन्" [अष्टाध्यायी १.१.२१] इति सूत्रभाष्यम् ।

फलस्य कर्मत्वे तादात्म्यं फलतावच्छेदकसम्बन्ध इति भेदस्य सत्वेन फलतावच्छेदकीभूत-तादात्म्यसंबन्धेन फलाश्रयस्यान्यस्याभावेनासहायत्वात् व्यपदेशिवद्भावः सुवच इति । तादात्म्यस्यापि फलतावच्छेदकसंबन्धत्वं स्वीकार्यमित्याशयेन व्यपदेशिवद्भाव इत्युक्तं ग्रन्थकृता । तादात्म्यस्य फलतावच्छेदकसम्बन्धत्वस्वीकारे क्रियाविशेषणानां कर्मत्वमिति वचनमेव प्रमाणम् । तच्च नापूर्वं वचनम् । "ओजस्सहोऽम्भसा वर्तते" [अष्टाध्यायी ४.४.२७] इत्यतो वर्तते इति प्रकृते "तत्प्रत्यनुपूर्वमीपलोमकूलम्" [अष्टाध्यायी ४.४.२८] इत्यनेन द्वितीयान्तेभ्यः वर्तते इत्यर्थे ठक् विधीयते । प्रतीपं वर्तते प्रातीपिकः इत्युदाहृतम् । अनेन द्वितीयान्तेभ्यः प्रत्ययविधानेन क्रियाविशेषणानामपि कर्मत्वमिति[५] सिद्धम् । एवञ्चैतद्वचनं सिद्धार्थानुवादकमिति मन्तव्यम् ।

अन्ये तावद् धातोः सर्वत्र फलावच्छिन्ने व्यापारे फलोत्पत्त्यनुकूलव्यापारे च पृथक् शक्तिः । स्तोकं पचतीत्यादौ क्रियाविशेषणस्य सर्वत्र उत्पत्तिरूपफलाश्रयत्वात् कर्मत्वं सिद्ध्यतीति न व्यपदेशिवद्भावावसर इति वदन्ति । तथा सति उत्पत्त्यर्थकधातुयोगे फलीभूतोत्पत्तेः उत्पत्त्यन्तराभावेन फलस्य कर्मत्वं दुर्वचमिति ग्रन्थोक्तरीतिरेवानु-सर्तव्या । व्यपदेशिवद्भावेनेति वदतो ग्रन्थकर्तुः तादात्म्यस्यापि फलतावच्छेदक-संबन्धत्वस्वीकारे तात्पर्यमिति बोध्यम् ।

अनन्तरं तत्र अयं स्तोकपदार्थः (स्तोकं पचतीत्यत्र चिन्ता नास्ति किन्तु यदा स्तोकं पाकः इत्यत्राऽपि पच्-धातुरस्ति, घञ्-प्रत्ययोऽप्यस्ति) । तत्र प्राचीनाः वदन्ति यदा अयं स्तोकपदार्थः धात्वर्थव्यापारे अन्वेति तदानीं स्तोकं पाकः इति भवति । पुनः यदा धात्वर्थफले अन्वेति तदानीमपि स्तोकं पाकः इति । किन्तु यदा तु प्रत्ययार्थे अन्वेति (अतः कस्मिन्नर्थे? भावे, भावो नाम धात्वर्थः, सिद्धावस्थापन्नः धात्वर्थः)[६] अयमेव अर्थः अत्रापि उक्तः । किन्तु यदा तु स्तोकपदार्थः प्रत्ययार्थे अन्वेति पच्+घञ् इत्यत्र घञ् इति प्रत्ययार्थे अन्वेति तदानीम् एतद्धर्मरूषितत्त्वं तद्विशेषणे भवति । नाम घञबन्तः[७] इति उच्यते कृदभिहितो भावो द्रव्यवत् प्रकाशते । सा यद्यपि पाकः इत्यत्र क्रिया

[५] "अव्ययीभावश्च" [अष्टाध्यायी १.१.४१] इति सूत्रे काशिकायाम् ।

[६] "सृ स्थिरे" [अष्टाध्यायी ३.३.१७] इति सूत्रे तत्त्वबोधिन्याम् ।

[७] लिङ्गानुशासने, सूत्रसंख्या ३६

एव किन्तु सा क्रिया द्रव्यत्वेन भासते । एवञ्च घञबन्तः[८] इत्यनेन यत् पुंस्त्वं प्रत्ययार्थे भवति तत् तस्य विशेषणेऽपि भासते, अतः स्तोकः पाकः इत्यपि भवति इति प्राचीनानुसारी मार्गः ।

तत्र नव्याः वदन्ति स्तोकं पाकः इति तु न भवति यतो हि द्रव्यं क्रियायाम् अन्वेति, द्रव्ये अन्यद् नान्वेति यथा कारकस्य कारकान्तरे नान्वयो भवति । सर्वेषां कारकाणां क्रियायामेव अन्वयः । अतः यथा पाकः इत्यत्र घञ्-प्रत्ययेन द्रव्यरूपा क्रिया बोध्यते तदानीं तस्मिन् द्रव्यत्वं यथा अतिदिष्टं (कृदभिहितो भावो द्रव्यवत् प्रकाशते)[९] तदानीम् अत्र क्रियात्वं वक्तुं न शक्यते । अतिदिश्यमानधर्मद्रव्यत्वविरुद्धस्वाश्रयक्रियात्वनिमित्तकः अन्वयो न भवति । अतः कृदभिहितो भावो द्रव्यवत् प्रकाशते इत्यनेन तस्मिन् व्यापारे यथा द्रव्यत्वम् उक्तम्, नाम द्रव्येऽपि क्रिया, क्रियायामपि द्रव्यम् इति व्यवहारोऽपि क्रियते । द्रव्यमपि कदाचित् क्रियात्वेन व्यवह्रियते । एकवारं दूरवाणीं ददातु इत्युक्तं चेत् तत् द्रव्यं यन्त्रं भवति । दूरवाणीं करोतु इत्युक्तं चेत् तदा दूरवाणी क्रिया भवति । अतः द्रव्यमपि क्रियायमाणं भवति । क्रियाऽपि द्रव्यायमाणा भवति व्यवहारे । किन्तु यदा घञ्-प्रत्ययेन क्रिया बोध्यते सा च क्रिया द्रव्यवत् भासते इति यदा उक्तं तदानीं तत्र क्रियात्वम् इति स्वस्मिन् विद्यमानधर्मः नाश्रयणीयः, अतः नान्वेतीति कथयति नागेशः । एवञ्च स्तोकं पाकः इति प्रयोगः न भवतीति नव्यानामाशयः । एवम् इदं यत् क्रियाविशेषणां कर्मत्वं क्लीबता च इति तत् सकर्मकस्थलेऽपि भवति अकर्मकस्थलेऽपि भवति । नाम यथा स्तोकं पचति इति सकर्मकः तद्वत् सुन्दरं हसति इत्यस्ति चेत् तत्र हस्-धातुः अकर्मकः, अतः तत्राऽपि भवति । तथा च कर्मत्वम् अतिदिश्यमानकर्मत्वम् इति प्राचीनानां मतं किन्तु नागेशः एवं व्यपदेशिवद्भावेन फलस्य फलाश्रयत्वम् इति किमर्थम् उक्तम् इत्युक्ते एतद्वचनं कुत्रापि नास्ति । अतः अविद्यमानवचनस्य आश्रयणापेक्षया स्वयमेव काचित् रीतिः उच्यते चेत् समीचीनम् इति तस्य (नागेशस्य) चिन्तनं स्यात् । अतः फलस्य व्यपदेशिवद्भावेन फलाश्रयत्वात् कर्मत्वम् इति रीतिः । तेन उक्ता इति प्रतिभाति । एवञ्च कृतिविषये कथं भवति इति चिन्तनीयम् । अनन्तरं यदि फलस्य व्यपदेशिवद्भावेन फलाश्रयत्वात् कर्मत्वमुच्यते तर्हि व्यापारस्यापि

[८] लिङ्गानुशासने, सूत्रसंख्या ३६

[९] "सार्वधातुके यक्" [अष्टाध्यायी ३.१.६७] इति सूत्रे तत्त्वबोधिन्याम् ।

व्यपदेशिवद्भावेन व्यापाराश्रयत्वात् कर्तृत्वं कुतो न? इत्यपि एकः प्रश्नो भवति । यथा आङ्ग्ले तु अस्माभिः श्रूयते—"good beginning is half done" इति । अर्थात् अल्पारम्भाः क्षेमकराः[१०] इति उच्यते । अतः क्रियायाः अपि कर्तृत्वम् इति वक्तुं शक्यते । एवञ्च प्रकृतकटं देवदत्तः इत्यादिष्वपि आरम्भक्रियायाः एव ग्रहणं वर्तते किन्तु तस्याः एव क्रियायाः कर्तृत्वम् अपि व्यपदेशिवद्भावेन कदाचित् वक्तुं शक्यम् इति प्रतिभाति । अतः व्यापारस्य व्यपदेशिवद्भावेन व्यापाराश्रयत्वम् उच्यते चेत् पाकः पचति इति प्रयोगः स्यात् । किन्तु प्रयोगः अस्ति नास्ति वेति चिन्तनीयम् । अतः स्वीयो विचारः उपस्थाप्यते इत्युक्तम् । यदि क्रियाविशेषणानां कर्मत्वं क्लीबता च इति तु फलविशेषणत्वे उच्यते । यदि सा रीतिः व्यापारविषयेऽपि उच्यते तदानीं पाकः पचति इत्यपि भवितुमर्हतीति प्रतिभातीति शम् ।

✶ ✶ ✶

Bibliography

1. *व्याकरणमहाभाष्यम्* (प्रदीपोद्योतसमुल्लसितम्, चतुर्थखण्डः) ; पतञ्जलिः ; भार्गवशास्त्री (सम्पादकः) ; चौखम्बा-संस्कृत-प्रतिष्ठान ; दिल्ली ; २०१८ ।
2. *व्याकरणमहाभाष्यम्* (प्रदीपोद्योतसमुल्लसितम्, प्रथमखण्डः) ; पतञ्जलिः ; भार्गवशास्त्री (सम्पादकः) ; चौखम्बा-संस्कृत-प्रतिष्ठान ; दिल्ली ; २०२१ ।
3. *व्याकरणमहाभाष्यम्* (प्रदीपोद्योतसमुल्लसितम्, षष्ठखण्डः) ; पतञ्जलिः ; भार्गवशास्त्री (सम्पादकः) ; चौखम्बा-संस्कृत-प्रतिष्ठान ; दिल्ली ; २०१८ ।
4. *व्याकरणमहाभाष्यम्* (प्रदीपोद्योतसमेतम्, द्वितीयोऽध्यायः, तृतीयखण्डः) ; पतञ्जलिः ; गुरुप्रसादशास्त्री (सम्पादकः) ; राष्ट्रिय-संस्कृत-संस्थानम् ; देहली ; २००६ ।
5. *व्याकरणमहाभाष्यम्* (प्रदीपोद्योतसमेतम्, प्रथमोऽध्यायः, द्वितीयखण्डः) ; पतञ्जलिः ; गुरुप्रसादशास्त्री (सम्पादकः) ; राष्ट्रिय-संस्कृत-संस्थानम् ; देहली ; २००६ ।
6. *प्रौढमनोरमा* (लघुशब्दरत्न-ज्योत्स्ना-प्रभा-कुचमर्दिनी-विभाटीकोपेता), भट्टोजिदीक्षितः ; सदाशिवशास्त्री (सम्पादकः) ; चौखम्बा-अमरभारती-प्रकाशन ; वाराणसी ; १९८३ ।
7. *प्रौढमनोरमा* (लघुशब्दरत्न-भावप्रकाशिका-भावबोधिनी-संस्कृत-हिन्दीव्याख्योपेता, पञ्चसन्धिपर्यन्ता) ; भट्टोजिदीक्षितः जयशङ्करलालत्रिपाठी (व्याख्याकारः, सम्पादकश्च) ; चौखम्बा-कृष्णदास-अकादमी ; वाराणसी ; २०१९ ।

[१०] "क्षेमप्रियमद्रेऽण् च" [अष्टाध्यायी ३.२.४४] इति सूत्रे सिद्धान्तकौमुद्याम् ।

8. *प्रौढमनोरमा* (लघुशब्दरत्न-भैरवी-रत्नप्रभाव्याख्योपेता, अव्ययीभावान्ता) ; भट्टोजिदीक्षितः ; सभापति-शर्मोपाध्यायः (व्याख्याकारः, सम्पादकश्च) ; वाणी-विलास-प्रकाशन ; वाराणसी ; २०५४ (वि.सं.) ।
9. *प्रौढमनोरमा* (लघुशब्दरत्न-रत्नप्रकाशिका भावप्रकाश-सरलाटीकोपेता, अव्ययीभावान्ता) ; भट्टोजिदीक्षितः गोपालशास्त्री-नेने (व्याख्याकारः, सम्पादकश्च) ; चौखम्भा-संस्कृत-संस्थान ; वाराणसी ; २००३ ; तृतीयसंस्करणम् ।
10. *प्रौढमनोरमा* (शब्दरत्न-बालप्रकाशिका-संस्कृतहिन्दीव्याख्योपेता, पञ्चसन्धिप्रकरणान्ता, प्रथमो भागः) ; भट्टोजिदीक्षितः ; द्वारिका-प्रसाद-द्विवेदी (व्याख्याकारः, सम्पादकश्च) ; चौखम्बा-सुरभारती-प्रकाशन ; वाराणसी ; २०११-१२ ।

✳ ✳ ✳